# ॥ वाल्मीकि रामायण ॥

## ३ अरण्यकाण्ड

## अध्याय २२

तत्प्रयातं बलं घोरमशिवं शोणितोदकम् ।
अभ्यवर्षन्महामेघस्तुमुलो गर्दभारुणः ॥ १ ॥

निपेतुस्तुरगास्तस्य रथयुक्ता महाजवाः ।
समे पुष्पचिते देशे राजमार्गे यदृच्छया ॥ २ ॥

श्यामं रुधिरपर्यन्तं बभूव परिवेषणम् ।
अलातचक्रप्रतिमं प्रतिगृह्य दिवाकरम् ॥ ३ ॥

ततो ध्वजमुपागम्य हेमदण्डं समुच्छ्रितम् ।
समाक्रम्य महाकायस्तस्थौ गृध्रः सुदारुणः ॥ ४ ॥

जनस्थानसमीपे च समाक्रम्य खरस्वनाः ।
विस्वरान्विविधांश्चक्रुर्मांसादा मृगपक्षिणः ॥ ५ ॥

व्याजह्रुश्च पदीप्तायां दिशि वै भैरवस्वनम् ।
अशिवा यातु दाहानां शिवा घोरा महास्वनाः ॥ ६ ॥

प्रभिन्नगिरिसङ्काशास्तोयशोषितधारिणः ।
आकाशं तदनाकाशं चक्रुर्भीमा बलाहकाः ॥ ७ ॥

बभूव तिमिरं घोरमुद्धतं रोमहर्षणम् ।
दिशो वा विदिशो वापि सुव्यक्तं न चकाशिरे ॥ ८ ॥

क्षतजार्द्रसवर्णाभा सन्ध्याकालं विना बभौ ।
खरस्याभिमुखं नेदुस्तदा घोरा मृगाः खगाः ॥ ९ ॥

नित्याशिवकरा युद्धे शिवा घोरनिदर्शनाः ।
नेदुर्बलस्याभिमुखं ज्वालोद्गारिभिराननैः ॥ १० ॥

कबन्धः परिघाभासो दृश्यते भास्करान्तिके ।
जग्राह सूर्यं स्वर्भानुरपर्वणि महाग्रहः ॥ ११ ॥

प्रवाति मारुतः शीघ्रं निष्प्रभोऽभूद्दिवाकरः ।
उत्पेतुश्च विना रात्रिं ताराः खद्योतसप्रभाः ॥ १२ ॥

संलीनमीनविहगा नलिन्यः पुष्पपङ्कजाः ।
तस्मिन्क्षणे बभूवुश्च विना पुष्पफलैर्द्रुमाः ॥ १३ ॥

उद्धूतश्च विना वातं रेणुर्जलधरारुणः ।
वीचीकूचीति वाश्यन्तो बभूवुस्तत्र सारिकाः ॥ १४ ॥

उल्काश्चापि सनिर्घोषा निपेतुर्घोरदर्शनाः ।
प्रचचाल मही चापि सशैलवनकानना ॥ १५ ॥

खरस्य च रथस्थस्य नर्दमानस्य धीमतः ।
प्राकम्पत भुजः सव्यः खरश्चास्यावसज्जत ॥ १६ ॥

सास्रा सम्पद्यते दृष्टिः पश्यमानस्य सर्वतः ।
ललाटे च रुजा जाता न च मोहान्न्यवर्तत ॥ १७ ॥

तान्समीक्ष्य महोत्पातानुत्थितान्रोमहर्षणान् ।
अब्रवीद्राक्षसान्सर्वान्प्रहसन्स खरस्तदा ॥ १८ ॥

महोत्पातानिमान्सर्वानुत्थितान्घोरदर्शनान् ।
न चिन्तयाम्यहं वीर्याद्बलवान्दुर्बलानिव ॥ १९ ॥

तारा अपि शरैस्तीक्ष्णैः पातयेयं नभस्तलात् ।
मृत्युं मरणधर्मेण सङ्क्रुद्धो योजयाम्यहम् ॥ २० ॥

राघवं तं बलोत्सिक्तं भ्रातरं चापि लक्ष्मणम् ।
अहत्वा सायकैस्तीक्ष्णैर्नोपावर्तितुमुत्सहे ॥ २१ ॥

सकामा भगिनी मेऽस्तु पीत्वा तु रुधिरं तयोः ।
यन्निमित्तं तु रामस्य लक्ष्मणस्य विपर्ययः ॥ २२ ॥

न क्व चित्प्राप्तपूर्वो मे संयुगेषु पराजयः ।
युष्माकमेतत्प्रत्यक्षं नानृतं कथयाम्यहम् ॥ २३ ॥

देवराजमपि क्रुद्धो मत्तैरावतयायिनम् ।
वज्रहस्तं रणे हन्यां किं पुनस्तौ च मानुषौ ॥ २४ ॥

सा तस्य गर्जितं श्रुत्वा राक्षसस्य महाचमूः ।
प्रहर्षमतुलं लेभे मृत्युपाशावपाशिता ॥ २५ ॥

समेयुश्च महात्मानो युद्धदर्शनकाङ्क्षिणः ।

ऋषयो देवगन्धर्वाः सिद्धाश्च सह चारणैः ॥ २६ ॥

समेत्य चोरुः सहितास्तेऽन्यायं पुण्यकर्मणः ।
स्वस्ति गोब्राह्मणेभ्योऽस्तु लोकानां ये च संमताः ॥ २७ ॥

जयतां राघवो युद्धे पौलस्त्यान्रजनीचरान् ।
चक्रा हस्तो यथा युद्धे सर्वानसुरपुङ्गवान् ॥ २८ ॥

एतच्चान्यच्च बहुशो ब्रुवाणाः परमर्षयः ।
ददृशुर्वाहिनीं तेषां राक्षसानां गतायुषाम् ॥ २९ ॥

रथेन तु खरो वेगात्सैन्यस्याग्राद्विनिःसृतः ।
तं दृष्ट्वा राक्षसं भूयो राक्षसाश्च विनिःसृताः ॥ ३० ॥

श्येन गामी पृथुग्रीवो यज्ञशत्रुर्विहङ्गमः ।
दुर्जयः करवीराक्षः परुषः कालकार्मुकः ॥ ३१ ॥

मेघमाली महामाली सर्पास्यो रुधिराशनः ।
द्वादशैते महावीर्याः प्रतस्थुरभितः खरम् ॥ ३२ ॥

महाकपालः स्थूलाक्षः प्रमाथी त्रिशिरास्तथा ।
चत्वार एते सेनाग्र्या दूषणं पृष्ठतोऽन्वयुः ॥ ३३ ॥

सा भीमवेगा समराभिकामा
सुदारुणा राक्षसवीर सेना ।
तौ राजपुत्रौ सहसाभ्युपेता
मालाग्रहाणामिव चन्द्रसूर्यौ ॥ ३४ ॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

---

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com